# श्रीपशुपति पञ्चास्य स्तवः
# shrIpashupati pa~nchAsya stavaH

सदा सद्योजातस्मितमधुरसास्वादपरया

sadA sadyojAtasmitamadhurasAsvAdaparayA

भवान्या दृक्पातभ्रमरततिभिश्चुम्बितपुटम् ।

bhavAnyA dR^ikpAtabhramaratatibhishchumbitapuTam .

अपां पत्युः काष्ठां श्रितमधिकशीतं पशुपते-

apA.n patyuH kAShThA.n shritamadhikashIta.n pashupate\-

र्मुखं सद्योजातं मम दुरितजातं व्यपनयेत् ॥ १॥

rmukha.n sadyojAta.n mama duritajAta.n vyapanayet .. 1..

जटान्तःस्वर्धुन्याश्शिशिरमुखवातैरवमतिं

jaTAntaHsvardhunyAshshishiramukhavAtairavamati.n

गतं वामां रुष्टामनुनयसहस्रैः प्रशमितुम् ।

gata.n vAmA.n ruShTAmanunayasahasraiH prashamitum .

किरत्ज्योत्स्नं वामं नयनमगजानेत्रघटितं

kiratjyotsna.n vAma.n nayanamagajAnetraghaTita.n

दधद्वामं वक्त्रं हरतु मम कामं पशुपतेः ॥ २॥

dadhadvAma.n vaktra.n haratu mama kAma.n pashupateH .. 2..

गले घोरज्वालं गरलमपि गण्डूषसदृशं

gale ghorajvAla.n garalamapi gaNDUShasadR^isha.n

निदाघान्ते गर्जद्घनवदतिनीलं वहति यत् ।

nidAghAnte garjadghanavadatinIla.n vahati yat .

निरस्तुं विश्वाघप्रचयमधितिष्ठद्यमदिशं

nirastu.n vishvAghaprachayamadhitiShThadyamadisha.n

ह्यघोरं तद्वक्त्रं लघयतु मदं मे पशुपतेः ॥ ३॥

hyaghora.n tadvaktra.n laghayatu mada.n me pashupateH .. 3..

पुमर्थानं पूर्तिं प्रणतशिरसां दातुमनिशं

pumarthAna.n pUrti.n praNatashirasA.n dAtumanisha.n

जलाभावो माभूदिति शिरसि गङ्गां वहति यत् ।

jalAbhAvo mAbhUditi shirasi ga~NgA.n vahati yat .

सुरेशासास्फूर्तिं मुकुटशशिभासा किरति तत्

sureshAsAsphUrti.n mukuTashashibhAsA kirati tat

मुखं तत् पुंरूपं हरतु मम मोहं पशुपतेः ॥ ४॥

mukha.n tat pu.nrUpa.n haratu mama moha.n pashupateH .. 4..

रमेशो वागीशो दिवसरजनीशौ परशुदृक्

ramesho vAgIsho divasarajanIshau parashudR^ik

सुरेशो दैत्येशो निशिचरकुलेशोऽथ धनदः ।

suresho daityesho nishicharakulesho.atha dhanadaH .

यदूर्ध्वांशुव्रातैश्शिवचरितवन्तः परिणताः

yadUrdhvA.nshuvrAtaishshivacharitavantaH pariNatAH

तदैशानं वक्त्रं हरतु भवपाशं पशुपतेः ॥ ५॥

tadaishAna.n vaktra.n haratu bhavapAsha.n pashupateH .. 5..